॥ वाल्मीकि रामायण॥

२ अयोध्याकाण्ड

अध्याय ५०

अथ रात्र्यां व्यतीतायाम् अवसुप्तमनन्तरम् ।
प्रबोधयामास शनैर्लक्ष्मणं रघुनन्दनः ॥१॥

सौमित्रे शृणु वन्यानां वल्गु व्याहरतां स्वनम् ।
सम्प्रतिष्ठामहे कालः प्रस्थानस्य परन्तप ॥२॥

स सुप्तः समये भ्रात्रा लक्ष्मणः प्रतिबोधितः ।
जहौ निद्रां च तन्द्रीं च प्रसक्तं च पथि श्रमम् ॥३॥

तत उत्थाय ते सर्वे स्पृष्ट्वा नद्याः शिवं जलम् ।
पन्थानमृषिणोद्दिष्टं चित्रकूटस्य तं ययुः ॥४॥

ततः सम्प्रस्थितः काले रामः सौमित्रिणा सह ।
सीतां कमलपत्राक्षीमिदं वचनमब्रवीत् ॥५॥

आदीप्तानिव वैदेहि सर्वतः पुष्पितान्नगान् ।
स्वैः पुष्पैः किंशुकान्पश्य मालिनः शिशिरात्यये ॥६॥

पश्य भल्लातकान्फुल्लान्नरैरनुपसेवितान् ।
फलपत्रैरवनतान्नूनं शक्ष्यामि जीवितुम् ॥७॥

पश्य द्रोणप्रमाणानि लम्बमानानि लक्ष्मण ।
मधूनि मधुकारीभिः सम्भृतानि नगे नगे ॥८॥

एष क्रोशति नत्यूहस्तं शिखी प्रतिकूजति ।
रमणीये वनोद्देशे पुष्पसंस्तरसङ्कटे ॥९॥

मातङ्गयूथानुसृतं पक्षिसङ्घानुनादितम् ।
चित्रकूटमिमं पश्य प्रवृद्धशिखरं गिरिम् ॥१०॥

ततस्तौ पादचारेण गच्छन्तौ सह सीतया ।
रम्यमासेदतुः शैलं चित्रकूटं मनोरमम् ॥११॥

तं तु पर्वतमासाद्य नानापक्षिगणायुतम् ।
अयं वासो भवेत्तावदत्र सौम्य रमेमहि ॥१२॥

लक्ष्मणानय दारूणि दृढानि च वराणि च ।
कुरुष्वावसथं सौम्य वासे मेऽभिरतं मनः ॥१३॥

तस्य तद्वचनं श्रुत्वा सौमित्रिर्विविधान्द्रुमान् ।
आजहार ततश्चक्रे पर्ण शालामरिं दम ॥१४॥

शुश्रूषमाणमेकाग्रमिदं वचनमब्रवीत् ।
ऐणेयं मांसमाहृत्य शालां यक्ष्यामहे वयम् ॥१५॥

स लक्ष्मणः कृष्णमृगं हत्वा मेध्यं पतापवान् ।
अथ चिक्षेप सौमित्रिः समिद्धे जातवेदसि ॥१६॥

तं तु पक्वं समाज्ञाय निष्टप्तं छिन्नशोणितम् ।
लक्ष्मणः पुरुषव्याघ्रमथ राघवमब्रवीत् ॥१७॥

अयं कृष्णः समाप्ताङ्गः शृतः कृष्ण मृगो यथा ।
देवता देवसङ्काश यजस्व कुशलो ह्यसि ॥१८॥

रामः स्नात्वा तु नियतो गुणवाञ्जप्यकोविदः ।
पापसंशमनं रामश्चकार बलिमुत्तमम् ॥१९॥

तां वृक्षपर्णच्छदनां मनोज्ञां
यथाप्रदेशं सुकृतां निवाताम् ।
वासाय सर्वे विविशुः समेताः
सभां यथा देव गणाः सुधर्माम् ॥२०॥

अनेकनानामृगपक्षिसङ्कुले
विचित्रपुष्पस्तबलैर्द्रुमैर्युते ।
वनोत्तमे व्यालमृगानुनादिते
तथा विजह्रुः सुसुखं जितेन्द्रियाः ॥२१॥

सुरम्यमासाद्य तु चित्रकूटं
नदीं च तां माल्यवतीं सुतीर्थाम् ।
ननन्द हृष्टो मृगपक्षिजुष्टां
जहौ च दुःखं पुरविप्रवासात् ॥२२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com